सण्डिशः, पुं, सन्दंशः। सँड़ाशि इति भाषा। यथा,—

"पायसं कृषराच्छागं देवान्नानि च यानि वै।
भुक्तानि यैरसंस्कृत्य तेषामन्त्राणि पापिनाम्॥
निपातितानां भूपृष्ठे उद्धृतान्हि निरोच्चताम्।
सण्डिशैरपकृष्यन्ते नरैर्याम्यैर्म्मुखात्ततः॥"

इति मार्कण्डेयपुराणे १४ अध्यायः॥

सण्डीनं, क्ली, खगगतिक्रिया। इत्यमरः॥ खगानां पक्षिणां गतौ स्थानान्तरसञ्चारे एताः क्रियाः व्यापाराः। कास्ता इत्याह प्रथमडीनं उड्डयनाय क्रमबन्धः। ऊर्द्धं डीनं उड्डीनं वियद्गमनम्। संगतं डीनं सण्डीनं वृक्षादौ पतनमिति। पृथक् पृथक् पक्षिगतिक्रियासु प्रडीनं सङ्कृतगमनमित्यन्ये। ओ डी ङ य गतौ डीङ च नभोगतौ भावे क्तः सुग्वाद्योदिति नत्वम्। इति भरतः॥

सततं, क्ली, (सन्तन्यते स्मेति। सं + तन + क्तः। समो वा हिततततयोरिति पक्षे मलोपः।) निरन्तरक्रिया। तद्वति, त्रि। इत्यमरः॥ तत्पर्य्यायः अनवरतशब्दे नित्यशब्दे च द्रष्टव्यः। अपि च।

"सतते त्वनवरतानारताश्रान्तसन्ततम्।
प्रसक्तासक्तनित्याजस्रानद्धाविरतानिशम्॥"

इति जटाधरः॥

(यथा, मनुः। ४। २२।
"एतानेक महायज्ञान् यज्ञशास्त्रविदो जनाः।
अनीहमानाः सततमिन्द्रियेष्वेव जुह्वति॥")

सतत्त्वं, क्ली, स्वभावः। इति हेमचन्द्रः। ६। १३॥

सतर्कः, त्रि, तर्केण सह वर्त्तमानः। सावधानः। इति लोकप्रसिद्धः॥

सतानन्दः, पुं, गौतममुनिपुत्त्रः। स च जनकराजपुरोहितः। इति शब्दरत्नावली॥

सतिः, स्त्री, (सनु दाने + क्तिच्। "सनः क्तिचि लोपश्चास्यान्यतरस्याम्।" ६। ४। ४५। इति नलोपः।) दानम्। अवसानम्। इति सातिशब्दटीकायां भरतः।

सती, स्त्री, (अस्तीति। अस् + शतृ। उगित्वात् ङीप्।) दुर्गा। साध्वी। इति मेदिनी। (यथा, कुमारे। १। २१।

"सती सती योगविसृष्टदेहा
तां जन्मने शैलवधूं प्रपेदे॥")

सौराष्ट्रमृत्तिका। इति हेमचन्द्रः॥ दानम्। अवसानम्। इति नानार्थसातिशब्दटीकायां भरतः॥ * ॥ स्थानविशेषे सत्यष्टोत्तरशतनामानि यथा,—

देव्युवाच।

"सर्व्वगा सर्व्वभूतेषु द्रष्टव्या सर्व्वतो भुवि।
सप्तलोकेषु यत्किञ्चिद्रहितं न मया विना॥
तथापि येषु स्थानेषु द्रष्टव्याः सिद्धिमीप्सुभिः।
स्मर्त्तव्या भूतिकामैर्व्वा ता वक्ष्यामि प्रयत्नतः॥
वाराणस्यां विशालाक्षी नैमिषे लिङ्गधारिणी।
प्रयागे ललिता देवी कामुका गन्धमादने॥
मानसे कुमुदा नाम विश्वकाया तथेश्वरे।
गोमन्ते गोमती नाम मन्दरे कामचारिणी॥
मदोत्कटा चैत्ररथे जयन्ती हस्तिनापुरे।
कान्यकुब्जे तथा गौरी रम्भा मलयपर्व्वते॥
एकाम्रके कीर्त्तिमती विश्वा विश्वेश्वरे विदुः।
पुष्करे पुरुहूतेति केदारे मार्गदायिनी॥
नन्दा हिमवतः पृष्ठे गोकर्णे भद्रकर्णिका।
स्थानेश्वरे भवानी तु विल्वके विल्वपत्रिका॥
श्रीशैले माधवी नाम भद्रा भद्रेश्वरे तथा।
जया वराहशैले तु कमला कमलालये॥
रुद्रकोट्यान्तु रुद्राणी काली कालञ्जरे तथा।
महालिङ्गे तु कपिला साकोटे कमलेश्वरी॥"

अत्र कपिलाम्बरा इति च पाठः।

"शालग्रामे महादेवी शिवलिङ्गे जलप्रिया।
मायापूर्य्यां कुमारी तु सन्ताने ललिता तथा॥
उत्पलाक्षी सहस्राक्षे हिरण्याक्षे महोत्पला।
गयायां मङ्गला नाम विमला पुरुषोत्तमे॥
विपाशायाममोघाक्षी पाटला पुण्ड्रवर्द्धने।
नारायणी सुपार्श्वे तु त्रिकूटे रुद्रसुन्दरी॥
विपुले विपुला नाम कल्याणी मलयाचले।
कोटवी कोटितीर्थेषु सुगन्धा माधवे वने॥
गोदाश्रमे त्रिसन्ध्या तु गङ्गाद्वारे रतिप्रिया।
शिवकुण्डे शिवानन्दा नन्दिनी देविकातटे॥
रुक्मिणी द्वारवत्यान्तु राधा वृन्दावने वने।
देवकी मथुरायान्तु पाताले परमेश्वरी॥
चित्रकूटे तथा सीता विन्ध्ये विन्ध्याधिवासिनी
सह्याद्रावेकवीरा तु हरिश्चन्द्रे तु चन्द्रिका॥
रमणा रामतीर्थे तु यमुनायां मृगावती।
करवीरे महालक्ष्मीरुमादेवी विनायके॥
अरोगा वैद्यनाथे तु महाकाले महेश्वरी।
अभयेत्युष्णतीर्थे तु अमृता विन्ध्यकन्दरे॥"

उष्णतीर्थेत्यत्र अश्वतीर्थेति च पाठः।

"माण्डव्ये माण्डवी नाम स्वाहा माहेश्वरे पुरे।
छगलाण्डे प्रचण्डा तु चण्डिकामरकण्टके॥
सोमेश्वरे वरारोहा प्रभासे पुष्करावती।
देवमाता सरस्वत्यां पारा पारातटे मता॥
महालये महाभागा पयोष्ण्यां पिङ्गलेश्वरी।
सिंहिका कृतशौचे तु कार्त्तिकेये तु शङ्करी॥
उत्पलावर्त्तके लोला सुभद्रा शोणसङ्गमे।
महासिद्धवने लक्ष्मीरनङ्गा भरताश्रमे॥
जालन्धरे विश्वमुखी तारा किष्किन्धपर्व्वते।
देवदारुवने पुष्टिर्मेधा काश्मीरमण्डले॥
भीमादेवी हिमाद्रौ च तुष्टिर्वस्त्रेश्वरे तथा।
कपालमोचने शुद्धिर्माता कायावरोहणे॥
शङ्खोद्धारे ध्वनिर्नाम धृतिः पिण्डारके तथा।
काला तु चन्द्रभागायामच्छोदे शिवचारिणी।
वेणायाममृता नाम वदर्य्यां वर्व्वसी तथा।
ओषधी चोत्तरकुरौ कुशद्वीपे कुशोदका।
मन्मथा हेमकूटे तु कुमुदे सत्यवादिनी॥*॥
अश्वत्थे वन्दनीया तु निधिर्वैश्रवणालये।
गायत्त्री वेदवदने पार्व्वती शिवसन्निधौ॥
देवलोके तथेन्द्राणी ब्रह्मास्येषु सरस्वती।
सूर्य्यविम्बे प्रभा नाम मातॄणां वैष्णवी तथा॥
अरुन्धती सतीनान्तु रामासु च तिलोत्तमा।
चित्ते ब्रह्मकला नाम शक्तिः सर्व्वशरीरिणाम्॥
एतदुद्देशतः प्रोक्तं नामाष्टशतमुत्तमम्।
अष्टोत्तरञ्च तीर्थानां शतमेतदुदाहृतम्।
यः पठेच्छृणुयाद्वापि सर्व्वपापैः प्रमुच्यते॥
एषु तीर्थेषु यः कृत्वा स्नानं पश्यति मानवः।
सर्व्वपापविनिर्म्मुक्तः कल्पं शिवपुरे वसेत्॥
यस्तु मत्परमः कालं करोत्येतेषु मानवः।
स भित्त्वा ब्रह्मसदनं पदमभ्येति शाङ्करम्॥
नामाष्टशतकं यस्तु श्रावयेच्छिवसन्निधौ।
तृतीयायामथाष्टम्यां वहुपुत्त्रो भवेन्नरः॥
गोदाने श्राद्धकाले वा अहन्यहनि वा पुनः।
देवार्च्चनविधौ विद्वान् पठन् ब्रह्माधिगच्छति॥
एवं वदन्ती सा तत्र ददाहात्मानमात्मना।
स्वायम्भुवेऽपि काले च दक्षप्राचेतसोऽभवत्॥
पार्व्वती चाभवद्देवी शिवदेहार्द्धधारिणी।
मेनागर्भसमुत्पन्ना भुक्तिमुक्तिफलप्रदा॥
अरुन्धती जपन्त्येतत्तदाप्ता योगमुत्तमम्।
पुरूरवाश्च राजर्षिर्लोकेषु जयतामगात्॥
ययातिः पुत्त्रलाभन्तु धनलाभन्तु भार्गवः।
तथान्ये देवदैत्याश्च ब्राह्मणाः क्षत्त्रियास्तथा।
वैश्याः शूद्राश्च बहवः सिद्धिमीयुर्यथेप्सिताम्॥
यत्रैतल्लिखितं तिष्ठेत् पूज्यते देवसन्निधौ।
न तत्र शोकदौर्गत्यं कदाचिदपि जायते॥"

इति मत्स्यपुराणे १३ अध्यायः॥*॥

सावित्री। यथा,—

यम उवाच।

"सावित्रीवरदानेन त्वं सावित्रीकला सती।
प्राप्ता पुरा भूभृता च तपसा तत्समा शुभे॥
यथा श्रीः श्रीपतेः क्रोड़े भवानीव भवोरसि।
सौभाग्या सुप्रिया त्वञ्च भव सत्यवति प्रिये॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २४ अध्यायः॥*॥

विद्यमाना। (यथा,—

"तथा समक्षं दहता मनोभवं
पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्व्वती
प्रियेषु सौभाग्यफला हि चारुता॥"

इति कुमारसम्भवे। ५। १॥)

सतीनः, पुं, वंशः। इति शब्दमाला॥ सतीलकः। इत्यमरटीकायां भरतः॥ (यथा, सुश्रुते। १। ४६।

"हरेणवः सतीनाश्च विज्ञेया बद्धवर्च्चसः॥"*॥

क्ली, जलम्। इति निघण्टुः। १। १२॥)

सतीनकः, पुं, (सतीन एव। स्वार्थे कन्।) सतीलकः। इत्यमरटीका॥

सतीर्थः, पुं, (समानस्तीर्थो गुरुर्यस्य। समानस्य सः।) परस्परैकगुरुशिष्यः। इति शब्दरत्नावली॥

सतीर्थ्यः, पुं, (समाने तीर्थे वासीति। "समानतीर्थे वासी।" ४। ४। १०७। इति यत्। "तीर्थे ये।" ६। ३। ८७। इति समानस्य सः।) परस्परैकगुरुशिष्यः। इत्यमरः॥ एकोऽभिन्नो